मः ॐ औं अङ्गदायै नमः ॐ अं पूर्णायै नम
ः ॐ अः पूर्णामृतायै नमः इति ॐ षोडश
कलात्मने सोममण्डलाय नमः इति संपू

29

ज्य पूर्ववन्मंडलं द्वयोर्विलिख्य त्रिकोण
त्रिरेखायां श्रं १८ कं १८ घ्रं १८ इति त्रि
पंचमं विलिख्य मूलत्रिकोणत्रयेण त्रिको
णं षट्कोणे षडंगं च संपूज्य गंगेसा
दितीर्थमावाह्य ध्यानं स्वभैरवस्वरादे
वौ स्वस्वमंत्रेण समभ्यर्च्य पूर्वादितः ग्लं
गगनरत्नेभ्यो नमः स्लूं स्वर्गरत्नेभ्यो
नमः सूं पातालरत्नेभ्यो नमः ल्लूं म
र्त्यरत्नेभ्यो नमः मध्ये ल्लूं नागरत्नेभ्यो
नमः इति संपूज्य हितीयादि संशोध्य
ऽभिसंवग्रणामृतीकृत्य तालत्रये
ण दिशः संबध्य गंधपुष्पधूपैर्मूल
मंत्रेण नवदेवीमावाह्य तालत्रयेण दिग्
बंधं विधाय रवग्रणामृतीकृत्य योनिं

गं
३

पदर्श्य स्वौः नमः इति संपूज्य शांभव
मुद्रांपदर्श्य षडंगेन सकलीकृत्य म
न्त्रमुद्रया पादुकामासाद्य मूलेनशापा
नमा पादुंदेवीविभावयेदिति ततो
देव्याज्ञामादाय घटसमीपे गुरुपादुं
ततः शक्तिपादुं भोगपादुं स्वपादुं यो
गिनीपादुं वीरपादुं बलिपादुकाश्चो
चमनीयपादुकाणि संस्थाप्य चर्वण
पुनकारणेन तत्त्वमुद्रया श्रीपादुकात्
समुद्धृत्यानन्दभैरवंतर्पयामिनम
इतिनमंत्रेणत्रिःसन्तर्प्य ततःश्री
गुरुंश्रीमच्छ्रीकोलानंदनाथश्रीपा
दुकांतर्पयामिनमः इतित्रिःसंतर्प्य
एवंपरमगुरुपरमाचार्यदीक्षांतर्प्य
श्रीपादुकामृतेनमूलेनश्रीत्रिपुरभैरवी

30

सा तु यो स वा ह नं सपरिकरां तर्पयामि नमः इति सन्तर्प्य ये दिति कलशपूजा विधिः अथ श्रीचक्रं पीठोपरि संस्थाप्य पूर्ववत्पीठपूजां विधाय श्रीत्रिपुरभैरवीं ध्यात्वा वाग्बीजेन वामनासापुटेन देवीं स्वहृदयात्तु समाञ्जलिमानीय तत्रावाह्य ॐ देवेशि भक्तिसुलभे परिवारसमन्विते यावत्त्वां पूजयिष्यामि तावद्देवि इहावह इति पठित्वा मूलान्ते श्रीकामेश्वरशिवसहिते श्रीत्रिपुरभैरवि इहागच्छ २ इह तिष्ठ २ इह सन्निधेहि २ इह सन्निरुध्यस्व २ मम सर्वोपचारसहितां पूजां गृहाण २ इत्यावाहनादिमुद्राः सन्दर्श्य श्रीचक्रोपरि प्राणप्रति

गं
३१

31

ह्रीं लेलिहाननमुद्रया विधाय दशदिग्वंधं कृत्वा वगुंठनं सकलीकृत्य परमीकृत्य येनुयोनीं प्रदर्श्य वराभयपुस्तकान्तर्म लाक्षमालांकुशपाशचापबाणकपाल कमलादिमुद्राः प्रदर्श्य श्रीपात्रास्थेन नतात्पर्येण सवाहनां सपरिकरां सा वरणां श्रीकामेश्वरभैरवसहितां श्री त्रिपुरभैरवीं तर्पयामि नमः इति त्रि स्तर्प्य पुनरपि मूलेन श्रीत्रिपुरभैर वीश्रीपादुकां तर्पयामि नमः इति त्रिः संतर्प्य मूलमुच्चार्य पुनस्तार्घं श्रीका मेश्वरसहितायै श्रीत्रिपुरभैरव्यै नमः पादयोः पाद्यं एवं मध्ये स्वाहा शिरसि आचमनीयं मधुपर्कं च स्वधामुखे ॥

स्नानीयं नमः सर्वांगे इति स्नात्वा प्य
ग्रडुग्रलेनां गंधोसविविचित्रपट्टवस्त्र
कुंकुमकस्तूरीचन्दनसिन्दूरमुकुटकेयू
रहारचर्यादिनानालंकारान्दत्वा पुन
राचमनीयं दद्यात् ततो मध्यानामाग
ष्ठैर्गंधो नमः इति गंधं धूं गृह्य तर्जनी
भ्यांगुष्माणि वौषडिति गुष्ठैः सम्पूज्य
धूपपात्रं फडिति संरक्ष्य ज्वलनस्थापयि
त्वा वामतर्जन्या संस्पृशन् श्रीपात्राग्र
तेन धूपं निवेदयामीति निवेद्य ॐ जग
द्ध्वनि मंत्रमातः स्वाहेति घंटां सम्पूज्य वा
मेन पाणिना तां वादयन् मध्यनामा
ग्रैर्धूपं धृत्वा गायत्री मूलमन्त्रं च पठन्
वनस्पतिरसोत्पन्नो गंधाढ्यो गन्ध उत्त

त्रि
३२

मः श्राद्ये यः सर्वदेवानां दीपोयं प्रतिगृ
ह्यतामिति त्रियोतु लदेवी दापयेत् त
तो दीपं संपूज्य संस्थाप्य पूर्ववत्नाल
मन्नेकृत्वा वाममध्यमध्यादीपपात्रे
स्थापत् दीपं निवेदयामीति निवेद्य
पूर्ववद्घंठां वादयेत् मध्यानामांगुष्ठेन
मध्ये दीपपात्रे ष्टवादर्शयेत् गायत्री
मूलेनपठन् सुप्रकाशो महादीपः स
र्वतस्तिमिरापहः सबाह्याभ्यंतरं ज्योति
र्दीपोयं प्रतिगृह्यतां इति दीपं दे
वी ततः स्वर्णादिपात्रे अंगमनवह
पत्रं चंद्ररूपं च कृत्वा मध्ये दीपमेकं
मष्टपत्रेषु दीपाष्टकं संस्थाप्य श्रीं सौः
ल्लं ल्लं ल्लं ल्लं सौः श्रीं रत्नदीपाय नमः
इत्येव मूलेन वाभ्यर्च्य स्थालके

+म

मस्तकांतमनुस्मृत्य नववारं मूलान्ते म
मस्तवक्कवकेशीयुने देविनवात्मिके
आशिकमिदं देवि गृहाण मम सिद्
ये इति वक्त्रमुद्रयानीरानयेत् ततो
नानानैवेद्यं गृहाणे दिपात्रे निक्षिप्य
मिन्यवशं ग्रंथेन मुद्रया मन्त्री कुसुम
लेसमथान मावामां गुष्ठेन नैवेद्यपात्रे
स्पृशन् मूलान्ते हेमपात्रगतं दिव्यंपर
मान्नं स सेन्दुकं पंचधा षड्रसोपेतं गृह
हाणपरमेश्वरि नैवेद्यं निवेदयामीति
इतनामांगुष्ठाभ्यां मुद्रयेत् ततः श्र
नाचमनीयं दत्वा मूलान्ते कर्पूरादि
युक्तं ताम्बूलं निवेदयामीति एवं हयान
सर्वेषामर्घ्यपात्रजलेनोत्सर्गकार्यः

ॐ ११

ततस्तत्त्वमुद्रया देवीं त्रिः सन्तर्प्य पू
र्वोक्तमुद्राः प्रदर्श्य योनिमुद्रां हृदि
क्षोभिणीं मुखे द्राविणीं भ्रूमध्ये आ
कर्षिणीं ललाटे वशिनीं ब्रह्मरंध्रे आ
ह्लादिनीं पंचमुद्रामयीं प्रदर्श्य कृता
ञ्जलिः श्रीत्रिपुरभैरवि देवेशि आव
रणं ते पूजयामीति आज्ञां गृहीत्वा आव
रणपूजामारभेत तत्रादौ आम्नायानि
मध्ययोरन्तराले गुरुमन्त्रान्ते श्री
मच्छ्री कोलानन्दनाथ श्रीपादुकां
पूजयामि नमः तर्पयामि नमः परम
गुरुश्री परमाचार्यश्री परमेष्ठिगुरु-
दिव्यौघश्री सिद्धौघश्री मानवौघश्री
पुनः गुरुश्री इति पूजयेत्तर्पयेच्च ॥

ततआग्नेये हृदयश्री ईशाने शिरश्री
नैरृते शिखाश्री वायव्ये कवचश्री म
ध्ये नेत्रत्रयश्री दिक्षु चतुर्षु अस्त्रश्री
इति पूजयेत् तर्पयेच्च ततः त्रिकोणे आ
ग्नेये रं रतिश्री ईशाने प्रीं प्रीतिश्री
वायुकोणे क्लीं मनोभवश्री इति पूज
येत् तर्पयेच्च ततस्त्रिकोणस्यैवोत्तरे
द्रां शोषणबाणश्री द्रीं द्रावणबाण
श्री तद्दक्षे क्लीं आकर्षणबाणश्री ब्लूं
वशीकरणबाणश्री तदग्रे सः उन्
मादबाणश्री इति संपूज्य संतर्प्य त
थैव तदुत्तरे सौः कामश्री क्लीं मन्म
थश्री तद्दक्षे ऐं कन्दर्पश्री ब्लूं मक
रध्वजश्री अग्रे स्त्रीं मीनकेतुश्री इति

त्रि· पूजयेत्तर्पयेच्च ततोऽष्टयोनिषु पूर्वा
३५ दितः अनंगकुसुमाश्री अनंगमेख
लाश्री अनंगमदनाश्री अनंगमदना
तुराश्री सुभगाश्री भगाश्री भगस
र्पिणीश्री भगमालाश्री इति पूजयेत्त
र्पयेच्च ततोऽष्टपत्रेषु पूर्वादितः अं असि
तांगभैरवश्री आं ब्राह्मीश्री १ इं रुरुभै
रवश्री ईं माहेश्वरीश्री २ उं चंडभैरवश्री
ऊं कौमारीश्री ३ ऋं क्रोधभैरवश्री ॠं वै
ष्णवीश्री ४ लृं उन्मत्तभैरवश्री लॄं वाराही
श्री ५ एं कपालिभैरवश्री ऐं माहेन्द्री
श्री ६ ओं भीषणभैरवश्री औं चामुं
डा[illegible]श्री ७ अं संहारभैरवश्री
॥

श्रः नारसिंहीश्री इति पूजयेत्तर्पयेच्च
ततो ग्रन्थिस्थानेषु पश्चिमादितः काम
रूपपीठश्री कोलगिरिपीठश्री क
लान्तकपीठश्री चोह्लारपीठश्री जा
लन्धरपीठश्री उड्डियानपीठश्री दे
वकूटपीठश्री इति पूजयेत्तर्पयेच्च त
तो हृत्तमंडलपश्चिमादितः ऊंधं ग्रैंथ
श्री हेरुकभैरवश्री वेतालभैरवश्री
त्रिपुरान्तकभैरवश्री अग्निजिकभैर
वश्री कालान्तकभैरवश्री कपालि
भैरवश्री एकपादभैरवश्री भीमरू
पभैरवश्री मलयभैरवश्री हाटकेश्व
रभैरवश्री इति पूजयेत्तर्पयेच्च ततश्च
त्वरये पूर्वादितः इन्द्रश्री अग्निश्री यम

त्रि॰ श्री निरृतिश्री वरुणश्री वायुश्री
पु॰ ईशानश्री इंद्रेशानयोर्मध्ये ब्रह्मश्री
वरुणानंतयोर्मध्ये विष्णुश्री इति
पूजयेत्तर्पयेच्च ततस्तेषामेवसमीपे
वज्रश्री शक्तिश्री दंडश्री खड्गश्री
पाशश्री ध्वजश्री गदाश्री त्रिशूल
श्री पद्मश्री चक्रश्री इतिपूजयेत्तर्प
येच्च ततस्तदग्रे पश्चिमे वटुक
श्री उत्तरे योगिनीश्री पूर्वे क्षेत्र
पालश्री दक्षिणे गणपतिश्री
इति पूजयेत्तर्पयेच्च वायव्ये वस्तुश्री
ईशाने द्वादशादित्याश्री आग्नेये प
कादशरुद्रश्री नैरृते सर्वभूतश्री इ
ति पूजयेत्तर्पयेच्च ॥

35

इमावरणं संपूज्य पुनरपि विन्दौ पूर्व
वन्मूलदेवीं समभ्यर्च्य मन्त्रयन्मध्ये म दः प्र
पं पुष्पाञ्जलिं दत्त्वा तथैव सम्पूज्य नि
त्यहोमं समाचरेत् यथा अग्नौ नलेवाचकं
विलिख्य विभाव्य वा प्राणाय स्वाहा
अपानाय व्यानाय उदानाय समा
नाय इति हुत्वा षडङ्गाहुतीः कुर्यात्
ततो मूलेन यथाशक्ति स्वदेव्या आहु
तीर्हुत्वा संहृत्य विसृज्य ततः मण्डल
कृत्वा वां वटुकाय नमः पद्यैर्देवीं
वटुकनाथ कपिलजटाभार भास्वर
त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय २
सर्वोपचारसहितं बलिं गृह्ण २ स्वाहा
इति वटुकबलिः आग्नेय्यां योगिनी

त्रिकोणं च तुर
स्रं

गायत्रीमंत्र
हुत्वा

ईशाने

त्रि ३५

ओं नमः ऊर्ध्वब्रह्मा इति यां योगिनी
भ्यः स्वाहा सर्वयोगिनीभ्यो हुं फट् स्वाहा
इति योगिनीबलिः नैरृते क्षां क्षीं क्षूं
क्षैं क्षौं क्षः क्षेत्रपालाय बलिः सहितं
बलिं गृह्ण २ स्वाहा इति क्षेत्रपालब
लिः वायव्ये गां गीं गूं गणपतये वर
वरद सर्वजनं मे वशमानय बलिं गृह्ण
स्वाहा इति गणपतिबलिः इति ब
लिं कृत्वा काकादिबलिमपि कृत्वा
गुरवे दद्यात् यथाशक्ति जपं विधा
य पुनरपि प्राणायामषडङ्गादिकं
गत्वा सानन्तरं गुह्यातिगुह्यगोप्त्री
त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भव
तु मे देवि त्वत्प्रसादान्महेश्वरि ॥

इत्यनेनैत्येनोमयंत्रफलं देवीवामह
स्तेसमर्प्य कवचसहस्रनामस्तोत्रादि प
ठित्वा ह्यांगं यनि पत्र प्रदक्षिणीकृत्य·
सामयिकः सहमंडलवल्लनं विधाय न
न्त्वसाधकाः सर्वे विनश्यन्तु विहृषका
श्चवस्याग्नी भवीमेलनुषसन्नोस्त्वनुरूः
सरा इत्याशिषां तिपठित्वा ईशाने नि
र्माल्येन निर्माल्यवासिने नमः इति स
हस्र ततः इतः हृदंजाग्रत्न मयस्तुभ्य
वस्यासहस्रसावाचापश्चाशुद्धेसमशि
ष्याप्राणदेहधर्माधिकारतोवद्धकेवल
ते तत्सर्वे मामदीयं श्रीत्रिपुरभैरवी
चरणे समर्पणमस्तु गेतत्सर्वं.
इति स्वात्मानं समर्प्य सदाशिवविदेहलिंगि
शिवे स्वानुग्रहाद्यामपरैः साक्षिकोस्मा

+चसकलं

त्रि
३७

भिः पात्रैमेः नीरूप्यार्थितैः कृतामे
षाभैरवीपद्धतिर्मनाक् इति श्रीत्रि
पुरभैरवीनित्यपूजापद्धतिः ॥

ॐ अथ वर्म प्रतन्यते श्रीपार्वत्युवा
च देवदेवं महादेवं सर्वशास्त्रविशा
रद कृपां कृत्व जगन्नाथ परमेशोसि
महामते १ सुंदरी या परा प्रोक्ता वि
द्या त्रिपुरभूरिका तस्यास्तु कवचं
दिव्यं सर्वं कथय तत्त्वतः २ तस्या
स्तु वचनं श्रुत्वा जगाद जगदीश्वरः
अद्भुतं कवचं देव्याः सुंदर्याः दिवि दू
पिव ३ श्रीईश्वर उवाच कथया
मि महाविद्याकवचं सर्वदुर्लभम्

शृणुष्वैवं च विधिना कृत्वा गोप्यं त्वया

पितन् ४ यस्याः प्रसादात्सकलं विभर्मि

भुवनत्रयं यस्याः सर्वं समुत्पन्नं यस्या

स्सद्यापि निष्टति ५ माता पिता जग

न्माता माद्ब्रह्मस्वरूपिणी सिद्धिर

त्रीच सिद्धा च बुद्धा सिद्धाद्ध हजं नष्ट ६

सर्वभूतहितकरी सर्वभूतस्वरूपिणी

ककारे पातु मां देवी कामिनी काम

दायिनी ७ एंकारे पातु मां देवी मूला

धारस्वरूपिणी ८ ईकारे पातु मां दे

वी रतिः सर्ववस्तुस्वप्रदा लकारे पातु मां

देवी इंद्राणी वरवल्लभा ९ ह्रींकारे

पातु मां देवी सर्वत्र शुभसुंदरी एवं व

र्णमहामाया शांभवी पातु मस्तकम् १०

त्रि॰
क॰
३१

ककारीपातुमांदेवी शर्वाणी हरगेहिनी मकारीपातुमांदेवी सर्वपापशमनी ११ ककारीपातुमांदेवी कामरूपधरासदा ककारीपातुमांदेवी शंवराप्रियासदा १२ लकारीपातुमांदेवी धराधरणिरूपधृक् ह्रींकारीपातुमांदेवी शंकरार्धशरीरिणी १३ पवनेर्वं ऐं महामायाकामराजप्रियावतु मकारीपातुमांदेवी सावित्रीसर्वदायिनी १४ ककारीपातुसर्वत्रकल्याणस्वरूपिणी लकारीपातुमांदेवी लक्ष्मीसर्वसुलक्षणा १५ ह्रींकारीपातुसर्वत्र देवीत्रिभुवनेश्वरी पवनेर्वं ऐं महामायापातुशक्तिस्वरूपिणी १६ वाग्भवं मस्तकंपा

त्ववरं नंकामसंजिका शक्तिरूपि-
णी पातुहृदयंमंत्रसिद्धिदा १७ सुंदरी
सर्वदापातुसुंदरीपरिरक्षतु रक्तवर्णा
सदापातुसुंदरीसर्वदायिनी १८ नाना
लंकारसंयुक्तासुंदरीपातुसर्वदा सर्वां
गसुंदरीपातुसर्वत्रशिवदायिनी १९
जगदाह्लादजननीशंभुरूपाचमांसदा
सर्वमंत्रमयीपातुसर्वसौभाग्यदायि
नी २० सर्वलक्ष्मीमयीदेवीपरमानंद
दायिनी पातुमांसर्वदादेवीनानाशब्द
निधिः शिवा २१ ततःपद्मनिधिर्देवी
शर्वाणीसर्वदायिनी दक्षिणामूर्त्तिर्मां
पातुऋषिःसर्वत्रमस्तके २२ पंक्तिःछं
दःस्वरूपातुमुखेपातुसुरेश्वरी गंधाष्ट

त्रि॰
क॰
६८

धात्रिका पातु हृदयं शंकरी सदा २३
सर्वसंमोहिनी पातु संक्षोभिणी सदाव
तु सर्वविद्राविणी पातु सर्वाकर्षणका
रिणी २४ सर्वाह्लादकरी पातु सर्वसंक्षो
भिणी सदा सर्वविद्राविणी पातु सर्वा
कर्षणकारिणी २५ क्षोभिणी सर्वदा
पातु वशिनी मां सदावतु आकर्षिणी स
दा पातु संमोहिनी सदावतु २६ रतिर्दे
वी सदा पातु भगा मां सर्वदावतु माहेश्व
री सदा पातु कौमारी सर्वदावतु २७ सर्वा
ह्लादनकारी मां पातु सर्ववशंकरी क्षेमं
करी सदा पातु सर्वांगसुन्दरी सदा २८ स
र्वांगयुवतिः पातु सर्वसौभाग्यदायिनी
वाग्देवी सर्वदा पातु वाशिनी सर्वदावतु २९

वशिनी सर्वदा पातु महासिद्धिप्रदा स
दा सर्वविद्राविणी पातु गणनायः सदा
वतु २१ दुर्गादेवी सदा पातु वटुकः स
र्वदावतु क्षेत्रपालः सदा पातु पातु
साधारशक्तिका २४ अनंतः सर्वदापा
तु वराहः सर्वदावतु पृथिवी सर्वदा
पातु स्वर्णसिंहासनं तथा २२ रक्तामृ
तं च सततं पातु मां सर्वकालतः सुधा
र्णवः सदा पातु कल्पवृक्षः सदावतु २४
श्वेतछत्रं सदा पातु रत्नदीपः सदावतु
नंदनोद्यानं सततं पातु मां सर्वसिद्धये २५
दिक्पालाः सर्वदा पातु इंद्राद्याः सक
लन्यावाहनानि सदा पातु अस्त्रा
णि पातु सर्वदा २५ शास्त्राणि सर्वदा

त्रि॰
स॰
३५

पान्तु योगिन्यः पान्तु सर्वदा सिद्धाः
पान्तु सदा देवी सर्वसिद्धिप्रदा वतु १६
सर्वांगसुंदरी देवी सर्वत्र सर्वदावतु
आनंदरूपिणी देवी चित्स्वरूपा चि
दात्मिका १७ सर्वत्र सुंदरी पातु सु
दरी भवसुंदरी पृथग्देवालये घोरे
संकटे दुर्गमे गिरौ १८ अरण्ये प्रान्तरे
वापि पातु मां सुंदरी प्रिया इदं कव
चमित्युक्तं मंत्रोद्धारश्च पार्वति १९
यः पठेत्प्रयतो भूत्वा त्रिसंध्यं नियतः
शुचिः तस्य सर्वार्थसिद्धिः स्याद्यद्य
न्मनसि वर्तते २० गोरोचनाकुंकु
मेन रक्तचंदनकेन वा स्वयंभूः कु
सुमैः शुक्लैर्भूर्जपत्रे शुभे स्मरे २१

श्मशाने प्रांतरे वापि शून्यागारे शिवालये सशक्त्या गुरुणा यंत्रं पूजयित्वा कुमारिकाः ७७ तन्मंत्रं पूजयित्वा च गुरुं पंक्तिं विशेषतः पूजयित्वा यथाशक्त्या स्तुत्वा च विधिना मुना ७८ धारयेत् गुरुणा यंत्रं पूजयित्वा कुमारिकाः नैवेद्यैः पूजयित्वा च गुरुं पंक्तिं नवेद्यैव च ७७ देव्यै बलिं निवेद्याथ नरं मार्जार सूकरैः नकुलैर्महिषैर्मेषैः पूजयित्वा विधानतः ८० धृत्वा सवर्ण मध्यस्थं कंठे वामस्तके भुजे स जित्यो स्तुभनत्वेन सूर्य स्यारय नेन था ७९ धारयित्वा कवचं सर्व सिद्धिं लभेन्नरः कवचस्य च माहात्म्य

त्रि॰
क॰
८॰

40

नाहं वर्षशतैरपि ४७ शक्नोमि तन्म
हेशानि वक्तुं तस्य फलं वयन नास्ति
वैरभयं तस्य न तत्र व्याधिपीडनम्
नाग्निसिंहभयं तत्र न चापि पीडनं म
वे म् विघ्नप्रशमनं सर्वं सर्वव्याधिवि
नाशनम् ४८ सर्वरत्नाकरं जेनोश्च
तुर्वर्गफलप्रदम् यत्र तत्र न वक्तव्यं
नरान्तव्यं कदाचन ४९ मंत्रं प्राप्य॰
विधानेन पूजयेत्सततं सुधीः तत्रा
पि त्रैलोक्यमन्त्रैकवर्णं देवद्वापिनि ५०
गुरोः प्रसादमासाद्य विद्यां प्राप्य सु
गोपिनाम् तत्रापि कवचं दिव्यं त्रैलो
क्यं भुवनत्रये ५२ श्लोकं वा स्तवमेवं
वा यः पठेत्प्रयतः शुचिः तस्य सर्वा

यं सिद्धिः स्याच्छंकरेणात्र भाषितं ५६
गुरुर्दैवो हरः साक्षात्पत्नी तस्य च
पार्वती अभेदेन यजेद्यस्तु तस्य सि
द्धिरहस्ततः ५७ इति श्रीविश्वसार
तंत्रे श्रीत्रिपुरभैरवीकवचं समाप्तं

ॐ अथ सहस्रनाम ॐ अथ वक्ष्ये
महेशानि देव्या नामसहस्रकम्
यत्प्रसादान्महेशानि सर्ववर्गफलं
लभेत् सर्वरोगप्रशमनं सर्वमृत्यु
विनाशनं सर्वशांतिकरं स्तोत्रं शं
करेणात्र भाषितं नातः परतरं स्तोत्रं
नातः परतरं तपः नातः परतरं वि
द्या तीर्थं नातः परात्परं यस्मात्सर्वमय

न्यत्रैयस्यामध्यायिनिहति त्रयमे॰
ध्यायितिनस्सर्वंलयकालेमहेश्वरि ॥
अस्यश्रीत्रिपुरभैरवीसहस्रनाम
स्तोत्रमंत्रस्य भगवान्शिवऋषिः
पंक्तिःछंदः आद्याशक्तिः भग
वतीत्रिपुरभैरवीदेवताधर्मार्थका
ममोक्षार्थेविनियोगः ॐत्रिपुराप
रमेशानीसर्वसिद्धिनिवासिनी स
र्वमंत्रमयीदेवीसर्वशक्तिसमन्वितः
सर्वधारमयीदेवीसर्वसंपत्प्रदा शुभा
योगिनीयोगमाताचयोगसिंधुनिव
र्तिनी योगिध्येयायोगिमातायोग
भोगविलासिनी लीलाहीलानया
क्रीडाकालरूपप्रवर्तिनी कालरू

या कालरात्रिः काली कमलवासि
नी कमला कान्तिरूपा च कामराजे
श्वरी क्रिया कूटः कपटवेशा च क
पटा कपटाकृतिः ॐकारा च विना
कौना कालरात्रिः क्रियास्पदः घो
रा वा घोररूपा घोररा वघूर्णा पद्
घंघेरा घोरिणी घूर्णी घोर नादप्रिया
स्मरा घोरा कारा घोरनरा च मौद्भुमे
घ्रदार्तिः घंटा घंघेरनारा च घंटा
नादप्रियासदा सूक्ष्मा सूक्ष्मनरा
स्थूला स्थितिः स्थूलकामरामतिः द्भमा
भीमानना भीमा भीमनादप्रवर्त्ति
नी सर्पेशा भयहरा भयदा भयना
शिनी श्मशानवासिनी देवी श्मशा

त्रि॰
स॰
४८

नालयवासिनी शवासनाशववहा
शवदेहा शवासवा शवहारा कंदर्द
र्पोशवकंकणधारिणी दंतवासद
नीसत्यासत्यासकेशपाशिनी स
त्यदेहासत्यहरासत्यवादविलासिनी
सत्यालयासत्यसंगासत्यासत्यवि
हारिणी असंगावसंगावसत्संगा
संगमोहिनी मायामतिर्महाविद्या
महामद्यविलासिनी मद्यहारामद्य
पानामद्यनिंदकनाशिनी गल्लकपि
रमालावक्षस्थितिद्रुतनिवासिनी महा
मद्यमदामत्तामांसपाशाद्गमांसगा
मांसाहारामांसधरामांसपूज्जीमांसभक्ष
णा रक्तपानारक्तरुचीरक्तास्थारक्त

लोचना रक्ताहारारक्तप्रियारक्तनिं
दकनाशिनी रक्तमार्गीरक्तरुचीर
क्तदेहास्वरक्तका स्वयंभूॐनम स्वाहा
स्वयंभूॐनमोऽस्तुका स्वयंभूॐडमाहा
रास्वयंभूनिंदकाश्चाका स्वयंभूपुष्प
संप्रीना स्वयंभूनिंदकांजका ॐडगो
लविलामावॐडसदारतिः ॐडगोल गोल
प्रियकरीॐडगोलमम्भवा शुक्रात्मि
काशुक्रकरासशुक्राचैवशुक्रिणी
शुक्रपूजनपूज्यावशुक्रनिंदकनिंद
का रक्तमाल्यारक्तपुष्पारक्तपुष्पक
पुष्पिका रक्तचंदनसिक्तांगीरक्तचंद
नवंदका मत्स्यामत्स्यप्रियामत्स्यसि
त्स्याभक्ष्यामहोदया मत्स्यकामामा

त्रि॰
स॰
४२

५३

स्महारामनस्मनिरकनाशिनी केक
यल्लीनयाहूराहूरसत्वविनाशिनी
हूरांमाकुलिशांगीवराज्यांगीराज्य
संभवा वज्रदेहावज्रहरावज्रकंका
लहारिणी निम्ननाभिभीतिहराभ
यदाभयहारिणी भयप्रदाभयभी
माभ्रभीमाभीमनादिनी सुंदरीशो
भनासत्याहेमाहेमंकरीनघा सिं
हाविनसीमंनासिंहूरमहशाकृति:
मुङ्कारं जिननासावसनाशास्विम
नासिका खर्वालंबोदरीदीर्घोदी
र्घघोरामहत्तवा कुटिलार्वविका
चंडीचंडनादाप्तिचंडिका अग्निचंडा
महाचंडप्रचंडाचंडवेगिनी चंडाली

चंडिका चंडशत्रूरूपमहाबला चंपा
चंपावतीचोद्दा नीलणा नीलणप्रिया
कृतिः जलदा जयदा योगा जगदानं
दकारिणी जगद्वंद्या जगन्माता जग
तीजगतः रूमा जयाजयाजयित्रीच
जयदाजयिनी तथा जननी च जगद्धा
त्री जयाख्या जयरूपिणी जगन्मान्या
जगन्माता जयश्रीर्जयकारिणी
जयिनी जयमाता च जया च विजया ज
ना खंगीनि खंगरूपा च सुखंगा खंगधा
रिणी खंगरूपा खंगकरा खंगांगी खंग
वल्लभा खंगदा खंगमाया च खंगिनी
खंगमंडली शंखिनी चापिनी देवी
वज्रिणी मुसली मतिः बाणिनी भिं

त्रि॰
स॰
७७

ठि पालीच पाशी वैवांकुशी सरी ध
नुर्बाटंकिनी वर्मीकुंनीचकाणीनासि
का मञ्जरी हलहयाचहलीरणनिवा
सिनी हलालयाहलहयाहलसंभ
वहृपिणी हलालाहलखेलाचचूलां
गीनूलवल्लभा नानास्वभारिणी दे
वीनानाशास्त्रसमुद्भवा लह्यालहयह
यालवालहलाभालाभहृपिणी ध
निनीधनदाधनाधनाधनरूपधराभक्त
धन्विनीधनवशाद्यावधनुर्मानीधरीध
रा धीरध्वाद्भ्रूधनामान्याधन्यांगीध
नवासिनी धर्मदाधनलाभाचधन
लभ्यामहाधनुः अशांतानाशांतरूपा
वस्यासमार्गनिवासिनी गगनागण

सेव्यावरगणांवारणवल्लभा गणदाग

णद्वारगणपागमागमन्त्र नंदिनी गम्या

वगमनाशावशोद्दारागदवर्धिनी प्रि

यहा प्रियभव्याव प्रियाप्रेमा प्रियान

नुः प्रियदा प्रियभाव्याव प्रियस्यभव

नोस्मिता स्त्र स्निग्धा स्थिरद्रूपाच स्थिरदा

स्थैर्यवर्धिनी चंचला चपला चालाच

पलांग निवासिनी गौरीकालीनघा

किन्नामायायाम्पा लतप्रभा सुंदरी

त्रिपुराभव्यात्रिपुरीश्वरवासिनी त्रिपु

रत्नासनी देवी त्रिपुरप्राणाणाशिनी

भैरवी भैरवस्थाच भैरवस्य प्रियातनुः

भैरवांगी भयंकरी भैरव्यी प्रियवल्ल

भा कालदा कालरात्रिश्च भद्रका-

त्यायनी क्रिया क्रयदा क्रयहा क्रेया क्र
यप्राणप्रियानघा ह्लींकारी कमलालं
त्मीः शक्तिः स्वाहा विभुः प्रभुः प्रकृ
तिः पुरुषश्चैव पुंनाम्नी पुरुषाकृतिः
पुरुषांगी पूरुषी वनघा प्रकृतिर्वृषधृ
न परमः परश्चैव मायानारायणी
मतिः ब्राह्मी माहेश्वरी चैव कौमारी वैष्ण
वी तथा वाराही चैव चामुंडा रुद्राणी
हरवल्लभा कौबेरी शांभवी कृष्णा का
त्यायन्यस्य पूजना दासी डाकि
नी विद्या विविद्या विक्रमानघा हं
सिनी राकिनी नीलगागा पवी गंपवा
हना केकरी कोटराक्षी व निर्भीषा

त्रि॰
स॰
९५

त्तमांसिका ललज्जिह्वासुजिह्वावद

नावनदायिनी वंद्रावंद्यप्रभावांद्रीवं

द्रकांतिस्तुतत्परा श्रमनापादनाभूषा

नहिः प्रपीरतिर्धजि: प्राशिनीवंद्रि

काकांतिर्ज्योतिस्त्वाप्री: प्रीतिरंगदा

पूर्णापूर्णामृताकल्पलतिकाकल्प

दानहा स्वाकल्पाकल्पहस्ताच कल्प

त्तयकरीतनु: कल्पाख्याकल्पभव्या

चकल्पत्तयकरीतनु: कल्पाख्याक

ल्पभव्याचकल्पवंदकवंदका श्वि

शाखीप्रेतमखीउल्कामुखीमहामुखी

सुमुखीलूकवदनाकाकास्याविक

टानना कृकिलास्याचसर्पास्यात्कुट

लीश्वरभानना नानामुखीनानाद्रू

त्रि॰
स॰
९६

46

पद्मारिणी धरणी धरा विश्ववंद्या विश्व
माता विश्वाख्या विश्वभाविनी सूर्यात्म
र्यप्रजा शोभा सूर्यमंडलसंस्थिता सू
र्यकांतिः सूर्यकला सूर्याख्या सूर्यभा
विनी तपिनी तापिनी धूम्रा मरीचिर्ज्व
लिनी रुचिः सुषुम्ना भोगदा विश्वा बो
धिनी धारिणी क्षमा युगदा युगह्रा यो
ग्या योगपदा योगप्रवर्धिनी वह्निमंडल
संस्थाव वह्निमंडलमस्तका वह्निप्रिया
वह्निवर्गा वह्न्याहाररमणी रंजिका वह्निजे
ना वह्निरागा वह्निदा वह्निनाशिनी व
ह्निप्रिया वह्निकला वह्नेशा वह्निस्थिता
सदा धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी
विस्फुलिंगिनी सःस्त्री स्वरूपा कपि

लाहव्यकव्यवहानघा नानातेजऽ
ह्रीदेवीपरंब्रलऊहुंविनी ज्योतिर्ब्र
ह्ममयीदेवीपरंब्रलस्वहृपिणी पर
मात्मा परापुएपापुएपदापुएपवर्धि
नी पुएपा हापुएपनाम्नीचपुएपवंध
प्रियानन्दः पुएपनाम्नीपुएपमात्यापु
रुषांगविवर्धिनी पुएपदेहापुएपक
रीपुएपनिंदकनिंदका पुएपकाल
हरापुएपासपुएपापुएपमालिका
पुएपशीलापुएपकीलिःपुएपनाम
समापरा पुएपसेवापुएपसूत्मापुरा
एपुरवल्लभा पुरुषापुरुषप्राप्राएा
पुरुषात्मस्वहृपिणी पुरुषांगीपुरु
षावपुरुषसप्रियानन्दः स्त्रपुष्पापु

त्रि॰
सु॰
५७

षकग्राणाेउष्महाउष्मवल्गना उष्माप्रिया
उष्महारागउष्मनंदकनंदका उष्माभ्लाउ
ष्ममालालालाउष्मानिंदकनाशिनी ग्रन
बाविग्रणापाचमनामानिलघातघ्या न
तन्त्रमाणारुश्रीदमहाधारनिवासिनी
महाशंखेश्वरीमात्रामनस्करीथामहोद
री लंबोदरीचलंबोष्ठीलंबनिम्नतनूद
री विंबौष्ठालब्धनासावलंबघोणास
लंबका ग्रनिलंवामहालंबाप्रलंबाल
बवाहिनी लंबहालंबणाक्षिचलंब
स्यालंबपूजिका निर्लंबाचसलंबाच
महालंबावज्रमा चंडघंटामहाघं
टाघंटनादप्रियामदा वाद्यप्रियावा
घरनास्वावाद्यानादनाशिनी वसत्तमा

सुरामा च रमणीयस्वभाविनी सुवर्णा
वर्णप्रदा रंभा रंभोरू रामवल्लभा रामप्रि
या रामकरीभा मां गौरी रमणी रतिः रतिप्रि
या रतिमती रतिसेव्या प्रिया रतिः सुरतिः
जरतिः शोभा सुशोभा शुभनाशिनी सु
शोभा च महाशोभा अतिशोभा सुशोभम
ना लोभनीया महालोभा सुलोभा लो
भवर्धिका लोभांगी लोभयुक्ता च लोभि
नी लोभनाशा क्रा लोभप्रिया महालो
भा लोभनिंदका निंदका लोभांगवासि
नी गंधा विगंधा गंधनाशिनी गंधां
गी गंधयुक्ता च सुगंधा प्रेमगंधिका दु
र्गंधा संतिगंधा च सुगंधा नित्यगंधिका
महागंधा सुगंधा हागंधनापाकना

त्रि॰
स॰
४८

शिनी पद्मा पद्मावती प्रेमा पद्मगंध
सुगंधिका पद्मालया पद्मकरा पद्मवा
हनवाहना पद्मस्था पद्मवक्त्रा च पद्म
क्रीडासुवह्निका पद्मानका पद्मवहा
पद्मप्रासादशंकरी पद्मनिदकनिंदा
च पद्मसंतोषवाहना रक्तोत्पलधरा
देवी रक्तोत्पलप्रिया सदा रक्तोत्प
लसंगंधा च रक्तोत्पलनिवासिनी
रक्तोत्पलगृहारामा रक्तोत्पलमनो
हरा सरक्तोत्पलनेत्रा च सरक्तोत्प
लत्रूपधृत् नारी नारायणी शानाना
रायणगृहप्रिया। नारायणस्वदेह॰
स्था नारायणमनोहरा नारायणस्व
देहस्था नारायणनमस्कृता नाराय

णांगसंभूता नारायणप्रियानन्दः वैस
वीविसर्पभूज्या च वैसर्पवीसंस्थितानन्दः
हरभूज्या हरश्रेष्ठा हरस्ववल्लभा हया
संहारे हरदेहस्था हरपूजनतत्परा
हरदेहसमुद्भूता हरांगवासिनी दनुः
हरपूजकभूज्या च हरनन्दनतत्परा
हरैदेहसमात्भूत्था हरक्रीडासदारति :
संसर्गसंगरहिता असंसर्गसंगनाशिनी
निर्जना विजया दुर्गा दुर्गदेहविवर्धि
नी दुर्गस्था दुर्गभूपा च दुर्गदेहविव
र्धिनी दुर्गदेहांतका दुर्गभूपिनी दु
र्गनाशिनी प्रेतप्रिया प्रेतकरा प्रेतदे
हसमुद्भवा प्रेतांगवासिनी प्रेता प्रेत
देहविमर्दका डाकिनीयोगिनीदे

त्रि॰
स॰
७२

वीकालरात्रिप्रियासदा कालरात्रिहरा
कालाकुलदेहामहानन्दा कृष्णांगीकु
लिशांगी च वज्रांगी वज्ररूपधृक् नाना
देहधरा धन्या षट्चक्रक्रमवासिनी
मूलाधारनिवासा च मूलाधारस्थिता
सदा वायुरूपा महामाया वायुमार्गनि
वासिनी वायुयुक्ता वायुकरा वायुपू
रकपूरकाः वायुरूपधरा देवी सुषुम्
णामार्गगामिनी देहस्था देहरूपा च
देहध्येया सदेहका नाडीरूपा च नाडी
ध्यानवीननलिनानना इडा च पिंग-
ला चैव सुषुम्ना च सरस्वती सदाशिव
प्रियकरी मूलप्रकृतिरूपधृक् ब्रह्म
नेशी महेशानी शृंगारांगनिवासिनी

उत्पत्तिस्थितिसंहर्त्रीप्रलयापदवासि
नी महाप्रलययुक्ताविश्वसंहार
कारिणी स्वधास्वाहाहव्यवहाहव्या
हव्यप्रियासदा हव्यस्याहव्यभक्षा
वहव्यदेहसमुद्भवा हव्यक्रीडका
मधेनुस्वरूपारूपसंभवा सुरभिर्नन्दि
नीपुण्यायज्ञांगीयज्ञवल्लभा यज्ञेश्व
यज्ञदेहावयोगिनीयोनिवाहिनी
अयोनिजासतीसत्याअसतीकुल
टाननुः अहल्यागोगतीगम्याविदे
हाविहनाशिनी गांधारीद्रौपदीदू
तीशिवाहूतीशिवाप्रिया त्रिपुरेशी
पंचदशीपौर्णमासीचतुर्दशी पंचमी
चतुर्थीषष्ठीनवमीचाष्टमीतथा एका

त्रिं सं पं

दशीदारदशीववापुरूपामयपदा सं
क्रान्तिमांसरूपावक्रवरूपाक्रनविद्या
परमात्मादिरूपाववाटिकादंडरूपपु
त्र यामरूपामहाकालीसंध्यासमंग
नाशिनी विद्यामायामरूपावयम
कन्यायमीयमा मातंगीकुलरूपाव
कुलीनाकुलनाशिनी कुलकांताकु
शाकुंभाकुंभदेहविवर्धका नारनाकु
लपंदावसनशभ्रहणश्रमा नदीसाग
रगा शांतिः शांतिरूपासशांतिका
श्राशातस्माहपादोभादोभरूपानि
वासिनी नदीशाशहशांतिसक्रतिः
स्रनिधनामही दिवारात्रिःपंचभूतदे
हावैवस्देहका कुरुकुलमाकिन्नम

50

स्लानागयज्ञोपवीतिनी वर्णिनी
डाकिनी शाकिनि: ऊहऊल्पा सङ्क
लिका अपराजिताच प्रत्यङ्गीर
जिताजयनाशनी जयाच विज
याचैव महिषासुरघातिनी मधु
कैटभहन्त्रीच चंडमुंड विनाशिनी
निसुंभसुंभहननी रक्तबीजप्रियं
करी काशी काशीनिवासाच म
धुरा पार्वती परा अपर्णा चंडिका
देवी मृडानी अंबिका कला शुक्ला
कृस्मा रक्तवर्णा च शारदेन्दुकलाकृ
ति: रुक्मिणी राधिका चैव कौर
मोर बी
व्य: परिकीर्तिता: १००० अंग्रहा
धिकसहस्रं तु देव्या नामानुकीर्ते

त्रि॰ स॰ ५१

नं महापातककोटिघ्नं तथैव चोप
पातकं गलेऽनेन स्तोत्रेण सर्वं न
श्यति तत्क्षणात् सर्वं वा श्लोकमे
कं वा पठन्वा स्मरन्नपि पठेद्वा-
पाठयेद्वापि स घोरमुच्येत बंधनात्
राजद्वारे भये दुर्गे संकटे गिरिदुर्गमे
प्रान्तरे पर्वते चैव नौकायां वा महे
श्वरि वह्निदुर्गे भये प्राप्ते सिंहव्याघ्र
भयाकुले पठन्वा स्मरन्मर्त्यः स
र्वसंकटनाशनः अपुत्रो लभते पुत्रं
दरिद्रो धनमाप्नुयात् सर्वशास्त्रप
रो विप्रः सर्वव्रतफलं लभेत् वादी
मूको भवेच्छीघ्रं राजा वश्यश्च जायते
गोरोचनाकुंकुमेन लिखित्वा स्तोत्रम

नन्यधीः गुरुणावैस्मवैवापिसर्वसि
द्धिफलंलभेत्‌ एवंस्तवर्णमध्यस्थंस
र्वकामंनतोलभेत्‌ स्त्रियावामभुजेधा
र्यंपुंसांवामकरेतथा आदित्यमंगल
दिनेशुभेवापिमहेश्वरि शनैश्वरदिने
वापिसर्वसिद्धिफलंलभेत्‌ प्रान्तरेवा
श्मशानेवानिशायामर्धरात्रके शून्य
वासेगृहेवापिलिखेद्यन्त्रंनदेशिकः
रजस्वलाभगंदृष्ट्वातस्यदृष्टावलिखे
त्तदा स्वयंभूःकुसुमैः शुक्रैःसुगंधिगं
धवंदनैः मृगनाभिरसान्नैश्च लिखि
त्वायत्नपूर्वकं लिखित्वाचैनमाप्नो-
तिधनैश्वर्यमनन्यधीः कुमार्यःपूज
यित्वात्वनार्यश्चैवविशेषतः पूजयि

त्रि॰
स॰
५८

त्वास्त्वऊँ स्त्रैमैर्गैधपवंदनवस्त्रकैः सिंदूरेर
त्नऊँ स्त्रैमैः पूजयेद्भक्तियोगतः अपरे
द्युः ऊँ माषैर्वा दशम्यांतं प्रपूजयेत्
सर्वाभीष्टफलं सोपि लभतेनात्र संशयः
दपि नात्र सिद्धाद्यपेक्षास्ति नवा स्मि
त्रारिदूषणं नवाप्रयासबाहुल्यं का
यक्लेशकरं तथा सर्वदा सर्वकाले
षु षट्सहस्रप्रमाणतः बलिं दद्याद्वि
दानेन प्रत्यहं पूजयेच्छिवाम् स्वयंभू
ऊँ स्त्रैमैः ऊँ क्लैर्बलिं दद्याद्दिवानिशाम्
पूजयेत्पार्वती देवी भैरवी त्रिपुरा वि
ना ब्राह्मणान्भोजयेन्नित्यं दशकं
द्वादशं तथा मासमेकं पटे चस्त्रवि
धं विपिनासना अपुत्रो लभते पुत्रम

52

पनो पनवा भवेत् मासद्वयेन विधि
नातथा मासत्रयेन च कृतीराज्यमवा
प्नोति तथा मासचतुष्टये दीर्घरोगा
न्मुच्यते नरः वमेक विराड्भवेत् सर्वैश्व
र्यैर्लभेद्धीनो मासषट्केन चैव च सप्तमे
खेचरत्वं चाष्टमे वाक्पतिर्भवेत् न
वमे सर्वसिद्धिस्त्वदशमे लोकपूजितः
एकादशे राजवश्यो द्वादशे शंभुपुरंदरः
वारमेकं पठेद्यस्तु स पूजाफलमाप्नु
यात् सम्यग्वा श्लोकमेकं वा यः पठे-
न्नियतः शुचिः स पूजाफलमाप्नो
ति भैरवेण च भाषितं आयुष्मान्प्रीति
योगे च बालो लोलाक्ष विशेषतः सौभाग्य
सिद्धियोगे च शोभने च महेश्वरि पंच

त्रि॰
स॰
५३

53

ण्यांवानथ्याषष्टांयत्रऊज्ञापिनिरुमि
नत्रशंकानविघेननचमात्रादिरूष
णं किमन्यहृद्धनादेविसर्वाभीष्टफ
लंलभेत् इतिश्रीविश्वसारेतंत्रेश्री
त्रिपुरभैरवीसहस्रनामस्तोत्रंसंपूर्णं
शुभम् ॥

ॐ अथस्तोत्रराजं ॐ ब्रह्मादयःस्तुतिश
तैरपिसूक्ष्मरूपांजानंतिनैवजगदा
दिमनादिमूर्त्तिम् तस्माद्वयंकुचनतां
नवकुंकुमाभांस्थूलांस्तुमःसकल
वाङ्मयमातृरूपाम् १ सद्यःसमुद्य
तसहस्रदिवाकराभांविद्याक्षसूत्र
वरदाभयचिह्नहस्ताम् नेत्रोत्पलैस्त्रि
भिरलंकृतवक्त्रपद्मांत्वांहारभारुरु

विंतां त्रिपुरे भजामः ५ सिंदूरपूररुचि
रं कुचभारनम्रं जन्मांतरेषु कृतपुण्यफ
लैकगम्यम् अन्योन्यभेदकलहाकु
लमानभेदैर् जांनंति किं जडधियस्तव रू
पमम्ब ६ स्थूलां वदंति मुनयः श्रुतं न
यो वदंति सूक्ष्मां वदंति वचसामधि
वासमन्ये त्वां मूलमाहुरपरे जगतां भ
वानि मन्यामहे वयमपाररूपां कृपाशि
मू ७ चंद्रावतंसकलितां शरदिंदुशुभ्रां
पंचाशदक्षरमयीं हृदि भावयंति त्वां पु
स्तकं जपवटीममृताढ्यकुंभं व्याख्यां च
हस्तकमलैर् दधतीं त्रिनेत्राम् ८ शंभुस्त्व
मद्रितनयाकलितार्धभागो विष्णुस्त्वम
म्ब कमलापरिरब्धदेहः पद्मोद्भवस्त्वम

त्रि॰
लो
५८

सिवागधिवास भूमिलेषा क्रियासज
गत्ति त्रिपुरे त्नमेव ६ आक्रिन्य वाग्भवम
वांश्वत्नरः परादौ न्मावान्य देवु विहिता
न्समुदारयंतीम् कर्णादिभिश्च करणैः
परदेवतांतां संविन्मयी हरिकदापि
नविस्मरामि ७ आक्रं च्य वाग्भमभि
जित्प ववैरिबद्रमालोक्य निश्चलादि
या निजनासिकाग्रम् ध्यायंति मूर्
ध्नि कलितेंदुकलावतंसं त्वद्रूपमंवक्ष
तिनसलक्ष्णार्क मित्रम् ८ त्वाप्राप्य
मन्मथ रिपोर्वपुरर्धभागं सृष्टिं करो
षिजगतामिति वेदवादः सत्यं तदं
द्रितनये जगदेकमातर्नोचेदशेषज
गतः स्थितिरेवनस्यात् ९ पूजांवि

पायत्क्रमैः स्मरपादपानां पीठेन वां
वकनकावलकं देवेषु गायंति सिद्ध
निर्नः सह किन्नरीभिरग्रहादितासवर
मारुणनेत्रपद्माः १० विद्युद्विलास
वपुषः श्रियमावहंतीं यांतीं स्ववासभ
वनान्निवराजधानीम् सौंदर्यमार्ग
कमलानि विकासयंतीं देवीं भजेत
परमामृतसिक्तगात्रीम् ११ आजन्म
जन्मभवनं भवनं कृतीनां वैतन्यमा
त्रनन्तमंबनवाश्रयामि त्रुलेशविस
मिरूपासितपादपङ्कां सौभाग्यजन्म
वसतिं विपुरेयण्यावत् १२ श्राह्रार्य
भाविभुवने सृजतेंद्रुरूपायातहिमा
तिंपुनरर्केन तःस्वशाज्ञा वह्नासि

त्रिभै
स्तो
११

55

काहरनिनत्सकलंयुगांतेनोशारदां
मनसिजातनविस्मरामि २६ नारायणीतिनरकार्णवतारिणीतिगौरीति
खेदशमनीतिसरस्वतीति ज्ञानप्रदे
तिनयनत्रयभूषिते तित्वामद्रिराजतन
येतिवुधाभवंति २७ येस्तुवंतिजगन्मा
तस्श्लोकैर्द्वादशभिः क्रमात त्वामनु
प्राप्यवाक्सिद्धिं प्राप्नुयुस्तेपरांश्रियम्
२ इतिश्रीत्रिपुरभैरवीपंचमांगस्तोत्रंस
मूर्णंशुभमस्तु ॥ भद्रम्



त्रिपुरभैरवी
पं.